# Skandaproktam Shivamahimavarnanam 2

# સ્કન્દપ્રોક્તં શિવમહિમાવર્ણનમ્ ૨

## Document Information

Text title : Skandaproktam Shivamahimavarnanam 2

File name : skandaproktaMshivamahimAvarNanam2.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 4 | 1-52||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 5, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવમહિમાવર્ણનમ્ ૨

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

સ્કન્દ ઉવાચ ।

વિજ્ઞાનાત્મા પરાત્માયં સર્વાત્માઽયં મહેશ્વરઃ ।
યેષાં તુ હૃદયારામ એવ ભૂતપતિઃ શિવઃ ॥ ૧॥

સ એવ પરમાનન્દો રસોઽયમમૃતો હરઃ ।
એષ વિપ્રૈર્મહાદેવઃ સર્વદાભીષ્ટદો મુને ॥ ૨॥

એનમેકે વદન્ત્યગ્નિં બ્રહ્માણં હરિમિન્દ્રકમ્ ।
એકો રુદ્રો મહાદેવો ન દ્વિતીયોઽસ્તિ કશ્ચન ॥ ૩॥

ઋતં સત્યં પરં બ્રહ્મ પુરુષઃ કૃષ્ણપિઙ્ગલઃ ।
ઊર્ધ્વરેતા વિરૂપાક્ષો વિશ્વરૂપો મહેશ્વરઃ ॥ ૪॥

યો વેદાદૌ સ્વરઃ શમ્ભુઃ વેદાન્તેષુ પ્રતિષ્ઠિતઃ ।
ઈશાનઃ સર્વવિદ્યાનાં સર્વભૂતાદિરીશ્વરઃ ॥ ૫॥

બ્રહ્મવિષ્ણ્વાદિ દેવાનામધિપો વિશ્વતોમુખઃ ।
જનિતા બ્રહ્મવિષ્ણૂનાં રુદ્રેન્દ્રાણાં મહેશ્વરઃ ॥ ૬॥

યમાનિલાનલાર્કાણાં દિવઃ પૃથ્વ્યા મહેશ્વરઃ ।
બ્રહ્માણં યો વ્યાધાદગ્રે તસ્મૈ વેદાનુપાદિશત્ ॥ ૭॥

વિશ્વતશ્ચક્ષુરીશાન વિશ્વતો બાહુરીશ્વરઃ ।
વિશ્વતઃ પાણિપાદોઽયં સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૮॥

અત્યતિષ્ઠદિદં સર્વમીશાનોઽયં દશાઙ્ગુલમ્ ।
યદ્ભૂતં યચ્ચ વૈ ભવ્યં વર્તમાનં મહેશ્વરઃ ॥ ૯॥

એતાવાનસ્ય મહિમાઽતો જ્યાયાંશ્ચ પૂરુષઃ ।
ભીષૈવ પવતે વાયુઃ ભીષૈવોદેતિ ભાનુમાન્ ॥ ૧૦॥

ભીષૈવ અગ્નિરિન્દ્રાદ્યા મૃત્યુર્ધાવતિ ભીતિતઃ ।
અપાણિપાદો જવનો ગ્રહીતાઽચક્ષુરીશ્વરઃ ॥ ૧૧॥

સ વેત્તિ વેદ્યજાતં ચ ન તં વેત્તીહ કશ્ચન ।
તમાહુરેકં પુરુષં જ્યોતિષાં જ્યોતિરીશ્વરમ્ ॥ ૧૨॥

હિરણ્યબાહુમીશાનં સર્વાઙ્ગેણ હિરણ્મયમ્ ।
એષોઽન્તરાદિત્યગતો નીલગ્રીવો વિલોહિતઃ ॥ ૧૩॥

બભ્રુશ્ચાયં મહાદેવ ઉગ્રેઽયં ચ સુમઙ્ગલઃ ।
યો વૈ રુદ્રઃ સ ભગવાન્ગીતશ્ચાથર્વણોત્તમૈઃ ॥ ૧૪॥

અન્નાનાં ચ પતિઃ શમ્ભુઃ ક્ષેત્રાધિપતિરીશ્વરઃ ।
મિત્રાધિપો મહાદેવસ્તથા ધનપતિઃ શિવઃ ॥ ૧૫॥

ભૂમાનન્દઘનો હ્યાત્મા સામગીતો મહેશ્વરઃ ।
એષ બ્રહ્મૈષ એવેન્દ્રઃ ઋગ્ભિર્ગીતો હરોઽવ્યયઃ ॥ ૧૬॥

નમસ્તે રુદ્ર ઇત્યાદિવાક્યૈશ્ચ યજુષોદ્ભવૈઃ ।
ઇતિહાસપુરાણેષુ ઈશો ગીતઃ પુરાતનૈઃ ॥ ૧૭॥

મહોપનિષદાંસારૈરયમેવ હિ ગીયતે ।
ભિદ્યતે હૃદયગ્રન્થશ્છિદ્યતે સર્વસંશયઃ ॥ ૧૮॥

હૃત્તમોનાશનં તસ્ય જ્ઞાનાદેવ હિ જાયતે ।
ન પ્રાણો ન મનશ્ચાયમસઙ્ગી સઙ્ગિવત્ સ્થિતઃ ॥ ૧૯॥

સહૈવ સન્તમપ્યેનં ન દેવા ન મહર્ષયઃ ।
ન વિદુર્બ્રહ્મવિષ્ણ્વાદ્યાઃ સેન્દ્રરુદ્રાર્કવાયવઃ ॥ ૨૦॥

સ ધ્યેયઃ પરમેશાન આકાશે દહરે હરઃ ।
સર્વે ભીતાઃ પ્રમુહ્યન્તિ દ્યાવાભૂમ્યોર્ય આન્તરઃ ॥ ૨૧॥

અનન્તો હ્યવ્યયાત્માયં પુરુષઃ પ્રકૃતેઃ પરઃ ।
યમજ્ઞાત્વા મહાદેવં મોહિતાઃ સસુરાસુરાઃ ॥ ૨૨॥

આત્માનં મન્યતે સર્વે દેહાહઙ્કારસંવૃતાઃ ।
માયયા દેવદેવસ્ય ચિત્રલીલસ્ય વર્ણિનઃ ॥ ૨૩॥

જિતમાયઃ સ એવેશ સ કારણમુમાપતિઃ ।
સ નિત્યો નિત્યભૂતાના ચેતનાનાં સ ચેતનઃ ॥ ૨૪॥

સ કારણં કારણાનાં પતીનાં પતિરીશ્વરઃ ।
જગતઃ કાલરૂપસ્ય કાલકાલો મહેશ્વરઃ ॥ ૨૫॥

મહાગ્રાસોઽયમીશાનો યસ્યોદનમહર્નિશમ્ ।
બ્રહ્મક્ષત્રાત્મકં વિશ્વં મૃત્યુર્યસ્યોપચેતનમ્ ॥ ૨૬॥

યદા ચર્મવદાકાશં વેષ્ટયિષ્યન્તિ માનુષાઃ ।
તદા શિવમવિજ્ઞાય દુઃખસ્યાન્તો ભવિષ્યતિ ॥ ૨૭॥

યદા તમસ્તન્ન દિવા ન રાત્રિઃ સ શિવઃ સ્વયમ્ ।
સ ચાક્ષરો નિત્યમાત્મા વિધાતા પરમોઽસદૃક્ ॥ ૨૮॥

પ્રપઞ્ચપઞ્ચીકરણે નિરતા યે શિવં વિના ।
તે વઞ્ચિતા મહેશેન સર્વે ચૈવ સુરાસુરાઃ ॥ ૨૯॥

પરવઞ્ચક ઈશાનો દેવદેવસ્ત્રિશૂલભૃત્ ।
ય એનં વિદુરીશાનમમૃતાસ્તે ભવન્તિ વૈ ॥ ૩૦॥

અથેતરે દુઃખયુક્તાઃ સંસારવશવર્તિનઃ ।
જરામરણસંયુક્તાઃ ષડ્વૈરિપરિમોહિતાઃ ॥ ૩૧॥

દેહાત્મવાદિનઃ સર્વે દૂષણાભિર્વિમોહિતાઃ ।
તાપત્રિતયમધ્યસ્થા ભ્રાન્તિમોહસમાકુલાઃ ॥ ૩૧॥

જાયન્તે ચ મ્રિયન્તે ચ કીટા ઇવ સુરા નરાઃ ।
વાનરા ઇવ સર્વેઽપિ પામરા દુઃખભાગિનઃ ॥ ૩૨॥

યસ્ય રૂપં મુને સર્વં જગદેતચ્ચરાચરમ્ ।
ભૂમિરાપોઽનિલો વાયુરાકાશં વ્યોમકેશભાક્ ॥ ૩૪॥

કેહિ તદ્દેવદેવસ્ય મહિમાનં પિનાકિનઃ ।
યજન્તિ યાગૈર્નિયતા યજમાના મહેશ્વરમ્ ॥ ૩૫॥

ભિક્ષવઃ કક્ષવત્સન્તિ વેદાન્તૈશ્ચ વિજાનતે ।
યોગિનો યુઞ્જતે યોગં યદ્વિજ્ઞાનાર્થમેવ હિ ॥ ૩૬॥

નાનાવર્ણાશ્રમૈર્ધર્મૈરિષ્ટાપૂર્તૈરુપાસતે ।
મન્ત્રૈર્મન્ત્રવિદઃ સામ્બમુપાસન્તે મહેશ્વરમ્ ॥ ૩૭॥

લેભિરે સ્વપદાન્યેવ યસ્ય લિઙ્ગાર્ચનેન હિ ।

બ્રહ્મવિષ્ણ્વાદયો રુદ્રા મુનયો મનવઃ સુરાઃ ॥ ૩૮॥

અસુરા નૃપવર્યાશ્ચ ગન્ધર્વાપ્સરસોરગાઃ ।
વિપદ્ભિઃ(દ્ભ્યો)મોચિતા એવ સમ્પદ્ભિશ્ચ નિયોજિતાઃ ॥ ૩૯॥

સર્વં વિશ્વાધિકસ્યૈવ નિઃશ્વાસાજ્જાયતે જગત્ ।
જાતં ચ વર્ધતે નિત્યં સ્થીયતે લીયતેઽસ્તિ ચ ॥ ૪૦॥

યસ્યાષ્ટમૂર્તિભિર્વ્યાપ્તં જગદેતત્ ત્રિશૂલિનઃ ।
અગ્નિઃ શિવ ઉમા સોમો આભ્યાં વ્યાપ્તં જગત્ ત્રયમ્ ॥ ૪૧॥

અગ્નીષોમાત્મકં વિશ્વં જાનન્તિ પરમર્ષયઃ ।
ન દેવાઙ્કયુતં ચૈવ ભગલિઙ્ગાઙ્કિતં સદા ॥ ૪૨॥

પુમ્પ્રકૃત્યોરિદં રૂપં તસ્માચ્છિવમયં જગત્ ।
અનઙ્ગમાતઙ્ગહરો હારાણાં હૃદયે સ્થિતઃ ॥ ૪૩॥

સ પરઃ પુરષઃ પ્રાણઃ પરમાત્મા સદાશિવઃ ।
અદ્વૈતોઽયં ચતુર્થોઽયં પઞ્ચકોશાતિગોહ્યયમ્ ॥ ૪૪॥

યસ્માદ્બ્રહ્મા તથા રુદ્રો વિષ્ણુર્વિશ્વં પ્રજાયતે ।
સર્વમન્યત્પરિત્યજ્ય ધ્યેયઃ સામ્બસ્ત્રિલોચનઃ ॥ ૪૫॥

ઉમાસહાયો ભગવાન્માયાયા ઈશ ઈશ્વરઃ ।
મઙ્ગલાપતિરીશાનો ભક્તાનાં મઙ્ગલપ્રદઃ ॥ ૪૬॥

અમઙ્ગલં હરત્યેવ ભક્ત્યા ભક્તૈરુપાસિતઃ ।
સર્વેશ્વરો મહાદેવઃ સર્વૈશ્વર્યસમન્વિતઃ ॥ ૪૭॥

જિતમાયો મહાદેવસ્તન્માયાવિજિતાઃ સુરાઃ ।
ક્ષેત્રાણાં ચ પતિર્દેવઃ પશુપાશવિનાશકઃ ॥ ૪૮॥

માયા પાશૈર્નિબધ્નાતિ જગત્સસુરમાનુષમ્ ।
મોચયેદમ્બિકાનાથઃ પશુભ્યઃ સચરાચરમ્ ॥ ૪૯॥

ભક્ત્યા પ્રસાદિતો દેવઃ સાક્ષાત્પશુપતિઃ શિવઃ ।
યસ્ય નિઃશ્વસનં વેદાનામનન્તિ મુનીશ્વરાઃ ॥ ૫૦॥

યઃ સોમભારૈરિજ્યેત સોમઃ સોમાર્ધશેખરઃ ।
પાર્વતીનાયકો નેતા સ્થાવરસ્ય ચરસ્ય ચ ॥ ૫૧॥

યસ્યાંશલેશં હિ જગત્ ભૂતં ભાવિ ભવત્તથા ।
સર્વં શિવમયં વિશ્વં નાશિવં વિદ્યતે મુને ॥ ૫૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવમહિમાવર્ણનં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૪ । ૧-૫૨॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 4 . 1-52..

Notes:
Skanda સ્કન્દ expresses about ŚivaMahimā શિવમહિમા while speaking to Jaigīṣavya જૈગીષવ્ય. He highlights that the entire Universe comprises of Śiva શિવ, and that nothing exists that is not Śiva શિવ.

Proofread by Ruma Dewan

---

*Skandaproktam Shivamahimavarnanam 2*
pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*